## RAMAKRISHNA MISSION VIDYAMANDIRA
(Residential Autonomous College under University of Calcutta)

P.G. SECOND YEAR
M.A./M.SC. FOURTH SEMESTER (January – June), 2012
Mid-Semester Examination, March 2012

Date : 26/03/2012
SANSKRIT (Nyaya)
Time : 11 am – 3 pm Full Marks : 100

**[Use separate Answer Books for each Unit]**

## Group – A

### Unit – I (Sa. S)

1. यथेच्छमेक: समाधेय: [1×15]
   a) को नाम परामर्श: ? न्यायसिद्धान्तमुक्तावलीमनुसृत्यानुमितौ तदुपयोगित्वं वादिमतं तिरस्कृत्योपस्थाप्यताम्।
   b) न्यायसिद्धान्तमुक्तावलीमनुसृत्य व्याप्ते: प्रथमलक्षणं विचार्यताम्।

### Unit – II (S.P.K.)

2. यथेच्छं एकस्योत्तरं देयम् [10]
   a) "शाब्दवोधे चैकपदार्थेऽपरपदार्थस्य संसर्ग: संसर्गमर्य्यादया भासते" इतिगदाधरग्रन्यस्तथा व्याख्यायतां येन सकल सप्तमीविभक्तेरर्थ:, 'च' कारस्य अर्थश्च परिष्कृत: स्यात्। एवं संसर्गमर्यादाशव्दस्यार्थं निरुप्य वाक्यस्यास्य शाब्दबोध: करणीय:।
   b) पदार्थ: पदाथनान्वेति न तु पदार्थैकदेशेन इति नियमकरणे को हेतु: ? एतादृशनियमकरणे को लाभ: ? गदाधरसरणिमवलम्ब्य व्याख्यायताम्।

3. यथेच्छं एकस्योत्तरं देयम् [10]
   a) "साध्याभावश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छदकावच्छिन्नप्रतियोगिताको बोद्धव्य: अत्र साध्याभावीयप्रतियोगितायां धर्मसम्वन्धयोरनिवेशे का क्षति: ? मथुरानाथदिशा व्याख्या कार्य्या।
   b) ननु तथापि गुणत्ववान् ज्ञानत्वात्, सत्तावान् जातेरित्यादौ विषयित्वाव्याव्यत्वादिसम्वन्धेन तादृशसाध्याभावाधिकरणे ज्ञानत्वजात्यादेर्वर्त्तमानत्वादव्याप्तिरिति माथुरी टीका। अत्र तथापि इत्यस्य कोऽर्थ: ? ग्रन्यस्यास्य सम्यग् व्याख्या कार्य्या।

### Unit – III (S.P.)

4. यथेच्छं प्रश्नत्रयं समाधेयम् : [3×5]
   a) उपाधि: कतिविध: ? प्रत्यकस्योदाहरणं देयम्।
   b) अवच्छेद्यावच्छेदकपदार्थयो: परिचयो देय:।
   c) साक्षात्–सम्बन्ध: क: ? कश्च परम्परासम्बन्ध: ? सोदाहरणं व्याख्येयम्।
   d) कतिविधं विशेषणम् ? सोदाहरणं व्याख्यायताम्।
   e) दण्डो नास्तोत्यस्य नैयायिकभाषायां कोऽर्थ: ?

## Group – B

### Unit – IV (S.A.)

5. यथेच्छमेकं विषयमाश्रित्य लघुर्निबन्धो बन्धनीय:। [15]
   प्रत्यक्षम्, उपमानम्

6. का च द्वादशलक्षणी ? तस्याः किम् प्रतिपाद्यम् इति ग्रन्थानुसारं विव्रियताम्। [10]

**अथवा**

किन्तावदधिकरणलक्षणम् ? मीमांसाशास्त्रम् आरम्भणोयं न वेति प्रथममतम् (भाट्टमतम्) अनुसृत्य उपपादनीयम्।

## Unit – V (N.C.)

7. बौद्धनये क्षणिकत्ववादो निर्णेयः। [15]

**अथवा**

योगाचारमतं विव्रियताम्।

8. यथेच्छं प्रश्नपञ्चकं समाधेयम् : [1×5]
   a) धर्मकीर्तिः कस्मिन् सम्प्रदाये राजते ?
   b) सामान्यं कथं बौद्धदर्शने नाङ्गीकृतम् ?
   c) वस्तुनः स्थायित्वस्वीकारे कति अतिशया विद्यन्ते ?
   d) प्रतीत्यसमुत्पाद-शब्दस्य कोऽर्थः ?
   e) किं नाम आलयविज्ञानम् ?
   f) प्रवृत्तिविज्ञानं किं नाम ?
   g) वाह्यविषयाः कैरनुमीयन्ते ?
   h) शून्यवाहिनः के नाम ?
   i) वेभाषिकाः कुत्र भिन्नत्वं रचयन्ति ?

## Unit – VI (S.P.)

9. बालोऽपि यो न्यायनये प्रवेशम्
अल्पेन बाञ्छत्यलसः श्रुतेन।
संक्षिप्तयुक्तन्वितर्कभाषा
प्रकाश्यते तस्य कृते मयैषा॥

व्याख्यायतामयं श्लोकः। [5]